संस्कृतवार्ताः

19.11.2024

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

· ब्राजीलस्य रियो डि जेनेरियो नगरे सतत विकास ऊर्जा संक्रमणस्य प्रथम सत्रस्य आरम्भ: किञ्चित कालानन्तरमेव भविष्यति।

· प्रधानमन्त्री मोदी वैश्विकनेतृभिः सह मेलनं चर्चां -परिचर्चां च कृतवान्, कीर स्टारमर इत्यनेन आगामिवर्षस्य आरम्भे भारतेन सह FTA इति मुक्तव्यापारे स्थगितवार्ता पुनः आरम्भस्य घोषणां कृतवान्।

· झारखण्ड-महाराष्ट्रयोः श्व: आयोक्ष्यमाणाय विधानसभा-निर्वाचनाय सर्वा: सज्जता: सम्पूरिता:।

· दिल्लीसर्वकारेण केन्द्रेण आग्रहः कृतः यत् सः राष्ट्रियराजधान्यां कृत्रिमवृष्ट्याः अनुमतिं प्रददातु,

· केन्द्रीय गृहमंत्री अमित शाहः अद्य गुजरातस्य गांधीनगरे पञ्चाशत् तमम् अखिलभारतीयआरक्षीविज्ञान सम्मेलनस्य उद्घाटनं कृतवान्।

<u>प्रधानमन्त्री-जी-विंशति:</u>

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान्, वैश्विकसङ्घर्षेण वैश्विकदक्षिणं संकटान् सम्मुखीकुर्वन् अस्ति। प्रधानमन्त्रिणा ब्राजीलदेशस्य रियो डी जनेरियोनगरे जी-विंशतिः शिखरसम्मेलनं सम्बोधयता वैश्विकदक्षिणस्य दुर्दशायाः विषयेभ्यः बलं प्रदत्तम्। सः वैश्विकसङ्घर्षाणां खाद्य-इन्धन-उर्वरकाणां च आपूर्तिं प्रति दुष्प्रभावं प्रकाशितवान्, जी-विंशतिः-सङ्घटनं एतेषां राष्ट्राणां समाव्हानानां प्राथमिकताम् दद्यात् इति आग्रहं कृतवान्। सामाजिकसमावेशस्य विषये एकं सत्रं सम्बोधयन् श्रीमोदी वैश्विकदक्षिणे वैश्विकसङ्घर्षाणां असमानुपातिकप्रभावं अपि प्रकाशितवान्। शिखरसम्मेलने निर्धनता-बुभुक्षयोः च निवारणाय वैश्विकएकरूपतायाः आरम्भः अभवत्, यस्य समर्थनं अशीति राष्ट्रैः कृतम् । जी-विंशतिः शिखरसम्मेलनस्य प्रथमदिने क्षुधा-निर्धनता-इत्येतयोः

वैश्विक-संयुतेः , वैश्विक-शासन-संस्थासु परिष्कारस्य च विषये सफल सत्राणां आयोजनं जातम्, तत्रैव अस्मिन् सम्मेलने नैकाः द्विपक्षीय-समागमाः अपि आयोजिताः, येषु प्रधानमन्त्री श्रीमोदी भागं भजितवान्। प्रथमदिने आयोजितेषु द्विपक्षीयोपवेशनेषु यूके, नॉर्वे, इन्डोनेशिया, इटली, फ्रांस् देशानां राष्ट्रप्रमुखाः सम्मिलिताः आसन्। उपवेशने व्यापारस्य, रक्षायाः, पर्यटनस्य च अन्येषां केषाञ्चन विषयाणां यथा एआइ, हरितोर्जा, अन्तरिक्ष इत्यादीनां विषये सहकार्याणां उपरि चर्चा जाता। एतत् स्थायिविकासः, जलवायुपरिवर्तनस्य, वैश्विकस्वास्थ्यस्य, आर्थिकपुनरुत्थानस्य, बहुपक्षीयतायाः भविष्यस्य च इत्यादीनां विषयेषु विस्तृतपरिधिषु केन्द्रितम् अस्ति।

प्रधानमन्त्रिणा घोषितं यत् ब्रिटेन इत्यत्र द्वौ नूतनौ वाणिज्य दूतावासौ उद्घाटितौ भविष्यतः।द्वितीये दिवसे सदस्याः द्वयोः सत्रयोः, सततविकासः ऊर्जासंक्रमणं च द्वितीयसत्रे च डिजिटलमूलसंरचनायाः विषये भागं गृह्णन्ति। प्रधानमन्त्री श्रीमोदी सततविकास ऊर्जासंक्रमणयोः च सत्रं सम्बोधयिष्यति। यतो हि IBSA (India Brazil South Africa) संयुतेः सदस्याः अपि अस्मिन् वर्षे ट्रोईका इत्यस्य भागाः सन्ति, अतः अपेक्षा अस्ति यत् एतानि राष्ट्राणि IBSA इत्यस्य अन्तर्गतं सामूहिकविषयेषु चर्चां कर्तुं शिखर-सम्मेलनावधौ मिलितुं शक्नुवन्ति। अपि च द्वितीये दिने अपि नैकाः द्विपक्षीयकार्यक्रमाः भविष्यन्ति इति।

<u>अमित शाह-आईपीएससी उद्घाटन:</u>

केन्द्रीय गृहमंत्री अमित शाहः अद्य गुजरातस्य गांधीनगरे पञ्चाशत् तमम् अखिलभारतीयआरक्षीविज्ञान सम्मेलनस्य उद्घाटनं कृतवान्। अस्य आयोजनस्य आयोजनं आरक्षीअनुसन्धानविकासविभागेन तथा च राष्ट्रियरक्षाशक्तिविश्वविद्यालयेन संयुक्तरूपेण कृतम्। उद्घाटनसत्रं सम्बोधयन् गृहमन्त्री विगतेषु पञ्चाशत्वर्षेषु भारते महत्त्वपूर्णपरिवर्तनानि प्रकाशितवान्, येन हि वैश्विकगतिशीलता अपि प्रभाविता। एतेषां परिवर्तनानां कारणात् आरक्षीबलस्य प्रकृतौ कार्ये च परिवर्तनस्य आवश्यकता अभवत् इति सः बोधितवान् । श्रीशाहः अवदत् यत् विगतदशवर्षेषु देशे अत्यन्तं संघर्षयुतेषु क्षेत्रेषु हिंसायाः न्यूनीकरणे उल्लेखनीयसफलता प्राप्ता। सः जम्मू-कश्मीरं, पूर्वोत्तरं, नक्सलवादेन प्रभावितक्षेत्रेषु च विद्रोहेण प्रभावितेषु क्षेत्रेषु हिंसायां सप्ततिः प्रतिशतं न्यूनतायाः उल्लेखं कृतवान्।

## प्रधानमन्त्री- ब्रिटेनस्य प्रधानमन्त्री

ब्राजीलस्य रियो डी जनेरियोनगरे जी-विंशतिः शिखरसम्मेलनावधौ प्रधानमन्त्री मोदी वैश्विकनेतृभिः सह मेलनं चर्चां -परिचर्चां च कृतवान्। प्रधानमन्त्री अद्य सामाजिकसंजालीयमाध्यमेषु स्वचर्चाविवरणं प्रकाशितवान्। सः मिस्रदेशस्य राष्ट्रपतिना अब्देल् फत्ताह् अल-सीसी इत्यमुना दक्षिणकोरियायाः राष्ट्रपतिना यूं सुक् येओल्, इत्यनेन यूरोपीय-आयोगस्य अध्यक्षेण उर्सुला वॉन् डेर् लेयेन् इत्यनेन च सह स्वस्य मेलनं प्रकाशितवान्। यूरोपीयसङ्घस्य अध्यक्षेण सह उपवेशनस्य अनन्तरं प्रधानमन्त्री अवदत् यत् भारतं वैश्विकहिताय यूरोपीयसङ्घेन सह मिलित्वा यथावदेव कार्यं करिष्यति। भारत-इण्डोनेशिया-देशयोः कूटनीतिकसम्बन्धानां पञ्च सप्ततिवर्षाणाम् पूर्त्यवसरे इन्डोनेशियादेशस्य राष्ट्रपतिना प्रबोवो सुबियान्तो इत्यनेन सह मेलनं कृत्वा प्रधानमन्त्रिणा वाणिज्ये, स्वास्थ्यसेवायां, सुरक्षायां च सम्बन्धान् इतोपि संवर्धनाय चर्चा कृता। अपरत्र पुर्तगालदेशीयेन प्रधानमन्त्रिणा लुइस् मोंटेनेग्रो इत्यनेन सह वार्ता नवीकरणीय ऊर्जा, हरितहाइड्रोजन, रक्षासहकार्यादि विषयेषु केन्द्रिता आसीत् । प्रधानमन्त्री ब्रिटिश-प्रधानमन्त्रिणा किर स्टारमर इत्यनेन सह अपि मेलनं कृतवान् । उभौ नेतारौ प्रथमवारं मिलितवन्तौ । उभयोः मध्ये अर्थव्यवस्था, व्यापार, नवीन-उदयमान-प्रौद्योगिकी इत्यादीनां विषये ध्यानं दत्त्वा भारत-यूके-व्यापक-रणनीतिक-सहभागित्वं सुदृढं कर्तुं स्वप्रतिबद्धतां पुनः पुष्टिं कृतवन्तौ। ब्रिटेनस्य प्रधानमन्त्री कीर स्टारमरः आगामिवर्षस्य आरम्भे भारतेन सह FTA इति मुक्तव्यापारे स्थगितवार्ता पुनः आरम्भस्य घोषणां कृतवान्। उभौ नेतारौ शीघ्रमेव मुक्तव्यापारस्य पुनः आरम्भस्य, वार्तायां च महत्त्वं रेखांकितवन्तौ। फ्रांसदेशस्य राष्ट्रपतिना इमैनुएल मैक्रों इत्यनेन सह प्रधानमन्त्रिणः उपवेशनं अन्तरिक्ष, ऊर्जा, एआइ इत्यादिषु संभाव्यक्षेत्रेषु केन्द्रितम् आसीत्। प्रधानमन्त्री फ्रांस्देशे आगामिनः एआइ एक्शन् इत्यस्य शिखरसम्मेलनस्य आयोजनार्थं राष्ट्रपतिमैक्रोन् इत्यस्य स्वागतं कृतवान्।

## निर्वाचनप्रचाराभियानम्

झारखण्ड-महाराष्ट्रयोः श्वः आयोक्ष्यमाणाय विधानसभा-निर्वाचनाय सर्वाः सज्जताः सम्पूरिताः। झारखण्डे विधानसभा-निर्वाचनस्य द्वितीये चरणे अष्ट-त्रिंशत्-निर्वाचनासनेषु मतदानं भविष्यति, महाराष्ट्रस्य च सर्वेषु अष्टाशीत्यधिक-द्विशत-निर्वाचनासनेषु एकस्मिन् चरणे मतदानं भविष्यति।

दिल्लीवायुप्रदूषणम् :

दिल्लीसर्वकारेण केन्द्रेण आग्रहः कृतः यत् सः राष्ट्रियराजधान्यां कृत्रिमवृष्ट्याः अनुमतिं प्रददातु, येन तीव्रवायुप्रदूषणसंकटस्य निवारणं भवेत। दिल्ल्याः पर्यावरणमन्त्रिणा गोपालरायेन केन्द्रीयपर्यावरणमन्त्रिणं भूपेन्द्रयादवं प्रति पत्रं लिखित्वा वायुप्रदूषणविषये आपत्समागमस्य अनुरोधः कृतः। नवदिल्ल्यां वार्ताहरैः सह वार्तालापं कुर्वन् रायमहोदयः अवदत् यत् विशेषज्ञैः सह परामर्शः कृतः अस्ति, तथा च दिल्ली-एनसीआर-क्षेत्रे धुमस्य विकीर्णनार्थं वायुगुणवत्तां च सम्यक् करणाय कृत्रिमवृष्ट्याः समयः आगतः अस्ति।

इसरो

भारतीय-अन्तरिक्ष-अनुसन्धान-सङ्घटनेन इसरो इत्यनेन गतरात्रौ अमेरिका-देशस्य केप-कानावेराल्-नगरात् स्पेसएक्स्-संस्थायाः फाल्कन-9-प्रक्षेप-यानेन स्वस्य परिष्कृततमं संचार-उपग्रहं जीएसएटी-20 इति सफलतया प्रक्षेपितम् अस्मिन् विषये प्रवदन् इसरो इत्यस्य अध्यक्षः एस सोमनाथः अवदत् यत्, अतीवसफलं प्रक्षेपणं जातम्, उपग्रहः अनुकूलः अस्ति, सौरपटलानि च नियोजितानि सन्ति।

।।इति वार्ता:।।